# बालमोदिनी

(संस्कृत बाल कविता)


## विद्यावाचस्पतिः मञ्जूषा कुलकर्णी



मंजुभारती प्रकाशन

पुणे

**बालमोदिनी** (संस्कृत बाल कविता)

**रचना** : डॉ. मंजूषा कुलकर्णी
(साहित्य अकादमी पुरस्कारप्राप्त लेखिका, कवयित्री)
साकेत / २५, जयवंत पालकर मार्ग,
पोद्दार रुग्णालयासमोर वरळी, मुंबई - ४०० ०३०.
भ्रमणध्वनी - ९०८२१६१५२४, ९८२२८३९४९१
Email : drmangushak@gmail.com

**कायमस्वरूपी पत्ता :** २३१, समर्थ अलंकार, फ्लॅट-२,
कवितांच्या बागेसमोर, ज्योतीनगर,
छत्रपती संभाजीनगर - ४३१ ००५.

**प्रकाशक** : सौ. उल्का मंगेश कुलकर्णी
**मंजुभारती प्रकाशन**
'अे' ५०४, महालक्ष्मी पॅलेस,
वेंकटेश शर्विल सोसायटी समोर,
सी.एन.जी. पंपासमोर, पारी कंपनी चौक,
नऱ्हे, पुणे - ४११०४१.

**प्रथम आवृत्ती** : मार्गशीर्ष शु. ३, शके १९४७
रविवार, दि. २३ नोव्हेंबर, २०२५

**अक्षर जुळवणी :** सौ. अनिता विनायक भालेराव
क्रिएशन,
जयश्री, १-एन, सेक्टर ए, एन-१,
सिडको, छत्रपती संभाजीनगर - ४३१००३.
भ्रमणध्वनी - ९४२३३ ९६८८१

**मुद्रक** : स्टार कॉपीयर्स प्रायव्हेट लिमिटेड
कुमठेकर मार्ग, सदाशिव पेठ, पुणे ३०

**ISBN** : 978-81-995633-9-1

**सर्वाधिकार** : © लेखिकेच्या स्वाधीन

**किंमत** : ₹ २००/-

# प्राक्कथनम्

बालगीतानि नाम बालकानां जीवनस्य अविभाज्यम् अङ्गं भवन्ति । तानि न केवलं तेषां मनोरञ्जनार्थम् उत तेषां समग्रविकासार्थं हितकराणि सम्भवन्ति । बालाकानां ज्ञान-संस्कार-संस्कृतिसंवर्धनार्थं बालगीतानाम् उपयोग: भवितुमर्हति ।

भाषा-सङ्गीत-नूतनशब्दज्ञान-लयज्ञानार्थं च बालगीतानि महदुपकारकाणि एव । बालगीतानां सम्बन्ध: तेषां भावनिकबन्धेन सह सम्भवति । बालगीतानि बालान् मोदयन्ति, अत:एव 'बालमोदिनी' इति मम संस्कृतबालगीतपुस्तकं सिद्धमस्ति । बालगीतमाध्यमेन बालेषु आत्मविश्वासस्य, सर्जनशीलताया: च संवर्धनं भवति ।

बालगीतेषु नवनूतनशब्दा: प्रयुक्ता: विद्यन्ते येन बालकानां भाषा-कौशल्यविकसनं शक्यते । बालगीतगायनेन सङ्गीते तेषां रूचिनिर्माणं सम्भूय सुरताललयै: सह सुपरिचय: भवितुमर्हति । बालानां ज्ञानसंवर्धनाय बालगीतेभ्य: ऋते नान्यत् समर्थसाधनमिति मन्ये ।

साहित्यविश्वे बालसाहित्यस्य महत्त्वम् अनन्यसाधारणमेव । बाल्ये ये ज्ञानसंस्कारा: भवन्ति तेन आजीवनं मनुष्यस्य जीवनसमृद्धि: सुशक्यते । अत: एव संस्कृतसेवारूपेण बालगीतरचना: स्फुरिता:, अनेन पुस्तकमाध्यमेन च प्रकाशिता: जायमाना: सन्ति ।

एतत् सत्यं यत् प्रौढसाहित्यनिर्मिति: सुसरला परन्तु बालसाहित्यनिर्मिति: नातिसरला इति । मम प्रयासेनानेन संस्कृतभाषासंवर्धने, बालमोदने च लाभ: स्यादिति काङ्क्षे । रसिकवरा: मम बालगीतलेखनस्य सानन्देन स्वागतं कुर्यु: इति आशा ।

**मञ्जूषा**

संस्कृतभारती
जयतु संस्कृतं, विश्वपोषकम्।

कार्यलयस्य सङ्केतः – ए५, आमोदबन सोसायटी, मुंजाबाचा बोळ, ४०९-अ, नारायण पेठ, पुणे - ४११०३०. दूरभाषा-सङ्ख्या - ०२०- २४४९०९००

## पुरस्कारः

भाषासंवर्धने शिशुसाहित्यस्य भूमिका अत्यन्तं महत्वपूर्णा भवति। शैशवादारभ्य भाषा मुखे भवति चेत् सा अग्रे सहजतया जनभाषा भवितुमर्हति। शिशूनां भाषाभ्यासे श्रवणभाषणयोः प्रयोगः आधिक्येन करणीयः भवति। अभिनयेन लयं धृत्वा पाठ्यन्ते चेत् शिशुगीतानि सहजतया शिशूनां कण्ठस्थानि भवन्ति।

संस्कृतसाहित्ये सरलभाषया आधुनिकशैल्या शिशुगीतानि अत्यल्पानि। अतः एव भगिनीमञ्जूषायाः एषः प्रयासः अभिनन्दनीयः। शिशूनां परितः यानि वस्तूनि सन्ति तानि अधिकृत्य महोदयया गीतानि रचितानि सन्ति। एतैः गीतैः बहवः शब्दाः शिशूनां परिचिताः भविष्यन्ति। यमकानुप्रासालङ्कारान् साधयितुं सा सुष्ठु प्रयत्नं करोति। तेन गीतगाने लयः भवेत्। शिशूनाम् आनन्दः भवेत्। एतानि गीतानि ससङ्गीतं प्रकाश्यन्ते चेत् शिशूनां प्रमोदाय भवेत्।

भगिनीमञ्जूषायाः प्रतिभा सर्वेषु विषयेषु स्वैरं सञ्चारं करोति इति अहं तया प्रतिदिनं प्रेषितानि गीतानि पश्यामि तदा अनुभवामि। अहो तस्याः प्रतिभायाः प्रपातः एव! संस्कृतभाषया अपि तस्याः बहूनि पुस्तकानि प्रकाशितानि सन्ति। अनेन पुस्तकेन शिशुभिः अपि तस्याः काव्यरसस्य केचन तुषाराः प्राप्ताः इति अतीव आनन्दस्य विषयः। शिशूनां कृते बालानां कृते च एतादृशानि गीतानि सा निरन्तरं लिखेत् इति अहम् आशासे।

प्रत्येकं गीतेन सह तत्र उपयुक्तानां कठिनशब्दानां चित्राणि भवन्ति चेत् शिशूनाम् अवगमनाय सौकर्यं भवेत् इति प्रतिभाति। शिशून् मनसि निधाय निर्मितम् एतत् पुस्तकं तेषां मनस्सु संस्कृतभाषाविषये रुचिम् उत्पादयेत् इति आशया विरमामि।

स्थानम् - पुणे

दि. ५-६-२०२५

शिरीष भेडसगावकर

**शिरीषः भेडसगावकरः**

संस्कृतभारती

अखिल-भारतीय-गीताशिक्षणप्रमुखः

# विषय-सूचि


| | | | |
|---|---|---|---|
| १. | कुरु वन्दनम् ! | ..... | ९ |
| २. | धान्यक्रयणम् | ..... | १० |
| ३. | पशुमित्राणि | ..... | ११ |
| ४. | स्वर-गीतम् | ..... | १२ |
| ५. | भारतं भारतम् | ..... | १३ |
| ६. | नदीमातर: | ..... | १४ |
| ७. | अस्ति-नास्ति | ..... | १५ |
| ८. | किं च कुत्र | ..... | १६ |
| ९. | उपरि - अध: | ..... | १८ |
| १०. | समये | ..... | १९ |
| ११. | ध्वनिगीतम् | ..... | २० |
| १२. | सरला वाणी | ..... | २१ |
| १३. | कस्मात् किम्? | ..... | २२ |
| १४. | संख्याबोधनम् | ..... | २३ |
| १५. | शाक: पाक: | ..... | २४ |
| १६. | फलानि | ..... | २६ |
| १७. | वस्त्राणि | ..... | २७ |
| १८. | मिष्टान्नानि | ..... | २८ |
| १९. | मम परिवार: | ..... | ३० |
| २०. | वर्णवर्णा: | ..... | ३१ |
| २१. | प्रियपुष्पाणि | ..... | ३२ |
| २२. | प्रियकवय: | ..... | ३३ |
| २३. | रामायणम् | ..... | ३४ |
| २४. | चल चल मित्र | ..... | ३६ |
| २५. | उड्डय गगने | ..... | ३७ |
| २६. | गीतवाद्यम् | ..... | ३८ |
| २७. | माता पचति | ..... | ४० |
| २८. | वनं वनम् अभयारण्यम् | ..... | ४१ |
| २९. | जलसृष्टि: | ..... | ४२ |
| ३०. | वृक्षा: | ..... | ४३ |
| ३१. | वासरनामानि | ..... | ४४ |
| ३२. | आकारा: | ..... | ४५ |
| ३३. | वाहनानि | ..... | ४६ |
| ३४. | भारतीयमासा: | ..... | ४७ |
| ३५. | ऋतुचक्रम् | ..... | ४८ |
| ३६. | भारतीया: उत्सवा: | ..... | ५० |
| ३७. | देवतावाहनानि | ..... | ५२ |
| ३८. | मम शरीरम् | ..... | ५३ |
| ३९. | दिक् ज्ञानम् | ..... | ५४ |
| ४०. | वर्णमालागीतम् | ..... | ५६ |
| ४१. | सेवामहे | ..... | ५८ |
| ४२. | अमृतं संस्कृतम् | ..... | ६० |
| ४३. | क: समय: | ..... | ६२ |
| ४४. | कदा च किम् | ..... | ६४ |
| ४५. | षड् रसा: भोजने | ..... | ६६ |
| ४६. | साहित्ये नवरसा: | ..... | ६७ |
| ४७. | प्राचीनभारतीयवैज्ञानिका: | ..... | ६८ |
| ४८. | नवग्रहा: | ..... | ६९ |
| ४९. | मातृसाहाय्यम् | ..... | ७० |
| ५०. | भारतीयसंख्यागणनम् | ..... | ७२ |
| ५१. | पात्राणि | ..... | ७३ |

# (१)

## कुरु वन्दनम् !

एहि वालक
प्रणम गणेशं
विद्यादेवं गणनायकम् ।।

देवी शारदा
विद्यारम्भे
प्रपूजनीया नित्यानन्दे ।।

नमय नस्तकं
शङ्करपुरत:
महादेव: सत्यस्वरूप: ।।

वन्द्या शिवानी
सती पार्वती
वीरा धीरा असुरमर्दिनी ।।

भज गोविन्दं
बालमुकुन्दं
मित्रसखागोपालकवृन्दम् ।।

धनदा वरदा
लक्ष्मीमाता
सदैव पूज्या सुकर्मप्राप्या ।।

ज्येष्ठान् श्रेष्ठान्
प्रणम सर्वदा ।
आशीषपरा प्रणतिरेका ।।

# (२)
## धान्यक्रयणम्

चल चल विपणिं पुत्र सत्वरम्
धान्यागारात् धान्यक्रयणम् ।।१।।

गोधुमतण्डुलमाषयवान्नम्
चणकमसूरमुद्गद्विदलम् ।।२।।

तृणधान्यानि अन्यान्यानि
दालद्विदलप्रकारकाणि ।।३।।

खादामश्चेत् नितरां शक्तिः
उत्तम-आरोग्यस्य च युक्तिः ।।४।।

पिष्टं कृत्वा गोलरोटिकाः
दालोदनं च फुल्लपूरिकाः ।।५।।

भोजनसमये ईशस्मरणम्
सात्त्विक-आहारस्वीकरणम् ।।६।।

## (३)
## पशुमित्राणि

मित्राणि मित्राणि पशुमित्राणि जानीमः
दृश्यन्ते सर्वत्र पशुमित्राणि पश्यामः ।।

दुग्धदायिका धेनुर्माता
क्षेत्रे कष्टान् करोति वृषभः
हम्मा हम्मा श्रुण्मः
वत्सैः सह खेलाम् ।।१।।

अश्वः धावति गजः चरति
अजः अजा च बँ बँ करोति ।
पृष्ठे तेषां गच्छामः
शावकैः सह खेलामः ।।२।।

भूँ भूँ म्याँव म्याँव शुनकबिडालौ
कपिः वृक्षे द्वौ चिक्रोडौ
तूष्णीं स्थित्वा पश्यामः
मन्दं मन्दम् अनुधावामः ।।३।।

## (४)

## स्वर–गीतम्

‘अ आ इ ई’ पठामः
उ ऊ ऋ ऌ वदामः ।
ए ऐ ओ औ लिखामः
वर्णान् सर्वान् गायामः ।।धृ।।

अ अ अम्बा, आ आ आम्रम् ।
देहि मे मातः, आम्रं शीघ्रम् ।।१।।

इ इ इक्षुः ई ई ईशा
ग्रीस्मे इक्षुरसस्य तृष्णा ।।२।।

उ उ उदरम्, ऊ ऊ ऊर्जा
अस्ति बुभुक्षा भोजनस्पर्धा ।।३।।

ऋ ऋ ऋषिः तं प्रणमामः
ऋ ऌ वर्णान् अपि स्मरामः ।।४।।

ए ए एडः ऊनदायकः
‘ऐ’ तः भवति ऐन्द्रजालकः ।।५।।

ओ ओ ओदनम्, औ औषधम्
प्रियम् ओदनं न तु औषधम् ।।६।।

## (५)
## भारतं भारतम्

भारतं भारतं नवीनभारतम् ।
विश्वगुरुः भारतं भवतु भारतम् ।।धृ।।

संस्कृतिः प्राचीना शास्त्रज्ञानम्
साहित्यं विपुलं हि कलागानम् ।।१।।

विश्वमेकनीडं हि मूलमन्त्रम्
प्रीतिरेव यत्रास्ति सख्यतन्त्रम् ।।२।।

शूरवीरभारतीयशस्त्रधारकम्
सन्ततिं च भारतीं पश्य तारकम् ।।३।।

शान्तिदं मुक्तिदं शक्तिभारतम्
भुक्तिदं मुक्तिदं भक्तिभारतम् ।।४।।

# (६)
## नदीमातर:

गङ्गागोदाभीमानर्मदा:
कृष्णाशरयुसिन्धुशर्मदा:
कावेरीगोमतीयमुना:
तापीब्रह्मपुत्रामहान.: ।।१।।

गङ्गा प्रवहति हिमालयात्
गोदात्र्यम्बकपर्वतात्
भीमाभीमाशङ्करात्
नर्मदामरकण्टकात् ।।२।।

कृष्णा महाबलेश्वरात्
गोमती गोमततालात्
शरयु: सिन्धु: कैलासात्
वहति कावेरी ब्रह्मनगात् ।।३।।

यमुना–यमुनोत्रीस्थलात्
तापी मुलताई– अचलात्
ब्रह्मपुत्रा मानसतीर्थात्
महानदी सिहावाक्षेत्रात् ।।४।।

नीरं मधुरं पिबाम: ।
नदीमातर: रक्षाम: ।।५।।

## (७)
## अस्ति–नास्ति

रात्रिः अस्ति, सूर्यः नास्ति
वृक्षः अस्ति फलं तु नास्ति
मार्गः अस्ति, यानं नास्ति
गेहम् अस्ति, चिन्ता नास्ति ।।

चन्द्रः अस्ति, तमः नास्ति
मेघः अस्ति वर्षा नास्ति
कोषः अस्ति, धनं तु नास्ति
आपणमस्ति चाकलेहं नास्ति ।।

मोदः अस्ति, क्रोधः नास्ति
आशा अस्ति निराशा नास्ति
विद्या अस्ति अविद्या नास्ति
देवः अस्ति, भयं हि नास्ति ।।

## (८)
## किं च कुत्र

कथय कन्यके
काक: कुत्र?
अम्ब अम्ब
वृक्षे तत्र ।।१।।

कथय सुप्रिये,
मृग: कुत्र?
निबिडमरण्यं
भवति यत्र ।।२।।

प्रिये च तनये
मत्स्य: कुत्र?
नदीसागरौ
भवत: तत्र ।।३।।

ब्रूहि आत्मजे
पक्षी कुत्र?
अनन्ताकाश:
स: वै तत्र ।।४।।

अयि मां पुत्रि
कमलं कुत्र?
भुवि जले च
उभयत्र ।।५।।

सुकुमारे सुते
राधा कुत्र?
कुञ्जवने च
कृष्णः यत्र ।।६।।

कन्ये दुहितः
माता कुत्र?
आव्हयाम्यहं
तत्र सर्वत्र ।।७।।

## (९)
## उपरि – अधः

मस्तकमुपरि चरणौ अधः ।
नभः उपरि, वसुधा अधः ।।१।।

स्वर्गः उपरि, पातालमधः ।
विमानमुपरि, नोका अधः ।।२।।

युतकम् उपरि, ऊरुकमधः ।
कञ्चुकी उपरि, शाञ्चिका अधः ।।३।।

हस्तौ उपरि, पदतलमधः ।
मुखं हि उपरि, उदरम् अधः ।।४।।

सूर्यः उपरि, दीपः अधः ।
किमपि उपरि किमपि च अधः ।।५।।

## (१०)
## समये

समये शयनं जागरणम्
आरोग्यस्य संवर्धनम् ।।१।।

समये दानम् आदानम्
सख्यस्य संवर्धनम् ।।२।।

समये भाषणम् अभाषणम्
शान्तेः संवर्धनम् ।।३।।

समये हसनं रोदनम्
भावनासंवर्धनम् ।।४।।

समये साहाय्यम् औदार्यम्
मानवतासंवर्धनम् ।।५।।

## (११)
## ध्वनिगीतम्

घुमड घुमड घुम् घुम्
नूपुरस्वरः छुम् छुम् छुम् ।।१।।

वर्षा वर्षति सर् सर् सर्
प्राचीनद्वारः कर् कर् कर् ।।२।।

जलबिन्दवः टप् टप् टप्
यष्टिर्लगति सप् सप् सप् ।।३।।

मल्लः चलति धप् धप् धप्
कर्णे गृहयं गप् शप् गप् शप् ।।४।।

बालः पिबति पयः गट् गट्
पचति ओदनं रट् रट् रट् ।।५।।

## (१२)
## सरला वाणी

एहि बालक जानीव:
शब्दभाण्डारं समानार्थकम् ।।धृ।।

सरस्वती भारती शारदा
माता जननी अम्बा वरदा ।।१।।

सूर्य: भानु: रवि: दिनकर:
चन्द्र: सोम: शुभङ्कर: ।।२।।

उद्यानम् उपवनं वाटिका
कमलं जलजं पुन: पद्मिका ।।३।।

नदी सरिता सागरगामिनी
महिला स्त्री नारी च मानिनी ।।४।।

सरला वाणी संस्कृतभाषा
पठने भवतु सदैव आशा ।।५।।

## (१३)
## कस्मात् किम्?

बीजात् वृक्षः ततः फलम्
फलात् बीजं पुनश्च तत् ।।१।।

दुग्धात् दधितक्रे च घृतम्
घृतात् जीवनदीर्घतमम् ।।२।।

कर्पासात् लभते सूत्रम्
सूत्रात् वस्त्रं पुनर्नवम् ।।३।।

शिशोः बालः युवकश्च
ततः प्रौढः वृद्धश्च ।।४।।

स्रोतात् प्रवाहः नदीजलम्
नद्यः सागरवृष्टिजलम् ।।५।।

मातुः पितुः स्नेहमयम्
देवांशः च पुनर्वयम् ।।६।।

## (१४)
## संख्याबोधनम्

एकं द्वे त्रीणि चत्वारि
मधुरं मधुरं नदीवारि ।।१।।

पञ्च षट् यानानि
सप्ताष्ट प्रियस्थानानि ।।२।।

नवदशखगा: नभाङ्गणे
बाला: खेलन्ति प्राङ्गणे ।।३।।

संख्याबोधनं दिने दिने
सुचारुगणनं क्षणे क्षणे ।।४।।

शून्यं भारतसंशोधनम्
शून्ये सर्वं समापनम् ।।५।।

## (१५)
## शाकः पाकः

खादत खादत शाकानि
पठत पठत नामानि ।।धृ।।

आलुकं वृन्ताकम्
पुष्पशाकं छत्त्राकम् ।।
मूलकं रक्तफलम्
पलाण्डुः गृञ्जनकम् ।।१।।

कर्कटी च भिण्डिका
वर्तुलकं हरितं च
मरीचिका महामरीचिका
गोराणी बिम्बिका ।।२।।

कोशातकी च कुष्माण्डः
पालकी कारवेल्लम्
आर्द्रकं पालङ्गशाकम्
शकरकन्दः धान्याकम् ।।३।।

टिण्डिशः अजगन्धः
मेथिका लशुनं पनसम्
अलाबुः केम्बुकम्
हरिद्रा कन्दशाकम् ।।४।।

कलायः आमात्मकी
कोशातकी अजमोदम् ।
श्रृङ्गाटकः सूरणः
पटोलः शकरकन्दः ।।५।।

शाकं शाकं पचामः ।
शाकं शाकं खादामः ।।

## (१६)

## फलानि

खादत फलानि मधुराणि ।
कदली सेवम् आम्राणि ।।१।।

लीचिका द्राक्षा दाडिमम्
आग्रलम् अमृतफलम् ।।२।।

नारिकेलं नारङ्गम्
तिंतिडीपनसं जम्बूफलम् ।।३।।

खर्जुरम् अनानसम्
मधुकर्कटी सीताफलम् ।।४।।

रामफलं कालिङ्गम्
बदरीफलं च अञ्जीरम् ।।५।।

प्रदरं विकुतं कीविफलम्
मधुनिम्बुकं दशाङ्गुलम् ।।६।।

मधुराणि मधुराणि
खादत फलानि मधुराणि ।।७।।

## (१७)
## वस्त्राणि

परिधरामः वस्त्राणि
नानाविधानि नवीनानि ।।धृ।।
युतकम् अन्तर्युतकं च
कटिवस्त्रं प्रावारकः ।
शिरस्त्राणं च पादकोषः
ऊरूकम् उष्णीशम् ।।१।।
धौतवस्त्रं कञ्चुकं
षाटिका चोलः निचोलः
अन्तरीयम् अर्धनिचोलः
चित्रवेष्टिः बृहतिका ।।२।।
और्णं कम्बलः प्रोच्छः
कौपीनं कोशेयं च
उत्तरीयं गलपटः
स्वेदकं गलबन्धनांशुकम् ।।३।।
अङ्गरक्षकः स्यूतवारः
पादांशुकम् अधोरुकम्
सूत्रसूत्रैश्च वस्त्राणि
वस्त्रवस्त्रैश्च शोभते ।।४।।

## (१८)
## मिष्टान्नानि

मिष्टमिष्टान्न-सेवनम्
मोदकरम् आमोदकरम् ।।धृ।।

रसगोलकं पायसं
दुग्धपूपिका मिष्टपाक:
मोदकं लड्डुकम्
पिण्डक: सितोपला ।।१।।

गुड: शर्करा नवनीतम्
दुग्धछिन्नकं सन्तानिका
रससन्तानिका बुन्दीपाक:
अमृती च कुण्डलिका ।।२।।

पयोहिमं हिमगोलकम्
कलाक: हैमी च
मधु: किलाट: कूर्चिका
घृतवर: गजक: मिष्टिका ।।३।।

चाकलेह६ मधुशीर्ष६
बताश: मधुमष्ठ:
हिमानी मधुर: संचावक:
मोहनभोग: फलपाक: ।।४।।

सोनपर्पट: तिलकुट्टम्
लाजमोदकं मधुरपिष्टकम्
सूत्रिका कौष्माण्डम्
चन्द्रकला कुट्टिलड्डुकम् ।।५।।

मुक्तापाक: चूर्णलड्डुकम्
भारतीयमिष्टान्नं परिपूर्णं विविधकम् ।
उत्सवानाम् अतिथीनां
भवतु स्वागतं विविधकम् ।।६।।

## (१९)
## मम परिवारः

माता सरला
अतीव वत्सला
जनकः मे
अतिस्नेहलः ।।१।।

बन्धुः अग्रजः अनुजः
भगिनी, अग्रजा
अनुजा च ।।२।।

सहोदराः चत्वारः मे
पितृव्यजाः त्रयाः च
मातुलेयः एकोऽस्ति
पितामहः पितामही ।।३।।

मातामहः मातामही
मातृपितृभगिन्यौ च
मातुलानि मातुलः
परिवारः मे अतुल्यः ।।४।।

## (२०)
## वर्णवर्णाः

लोहितकृष्णनीलाः
पाटलश्वेतहरिताः
श्यावः कौसुम्बः धूम्रः
पीतः गगनवर्णीयः ।।१।।

धूमलः अरुणः शोणः
कपिलः सुवर्णवर्णश्च
रजतवर्णःअसितनीलः
असितलोहितः सुन्दरः ।।२।।

सप्तवर्णीया आकृतिः
इन्द्रधनुः प्रकृतिः
वर्णैः सुन्दरता च
जीवने मोहकता च ।।३।।

## (२१)
## प्रियपुष्पाणि

बाला: नाम पुष्पाणि
देवै: विकसितपुष्पाणि ।।धृ।।

गन्धपरिमलयुक्तानि
प्रियप्रियतराणि पुष्पाणि
जातीपुष्पं पाटलं
कमलं दिवाकरश्चेति ।।१।।

कर्णोर: स्थलपद्मानि
मल्लिकाजपाकुसुमानि
यूथिका कुमुदिनी मोहिनी
दालियापुष्पं किंशुकुम् ।।२।।

भृङ्गराज: धतुर:
राजाभरणं पारिजातकम्
रजनीगन्धा शेफालिका
चम्पकं स्वर्णचम्पकम् ।।३।।

नागकेसरम् इन्दीवरम्
कृष्णकमलं कैतकम्
नानाविधानि पुष्पाणि
मनोहराणि पुष्पाणि ।।४।।

## (२२)
## प्रियकवयः

भासः हासः प्रथितयशः
त्रयोदशनाटकानि च
जगति प्रसिद्धं सञ्जातं
स्वप्नवासवदत्तं च ।।१।।

कालिदासः विलासः
शकुन्तलायाः अभिलाषः
तस्य विक्रम-उर्वशीयं
ऋतुकुमाररघुमेघदूतम् ।।२।।

भारवेः अर्थगौरवं
काव्यं किरातार्जुनीयम्
भवभूतेः रामचरितं
कारुण्यं च महारूपम् ।।३।।

माघः कुशलः काव्यगुणं
काव्यं तत् शिशुपालवधम्
हर्षस्य नैषधचरितं
संस्कृतसाहित्ये व्यापृतम् ।।४।।

महाकाव्यानि अमराणि
नाटकानि ख्यातानि
कथाकादम्बरीश्लोकाः
अमृतवाण्यां ख्याताः ।।५।।

## (२३)
## रामायणम्

वाल्मिकिना लिखितायनं
कथ्यते रामायणम् ।
तन्मध्ये श्रीरामस्य
चरित्रं हि आख्यायितम् ।।१।।

राम: आसीत् कीदृश: ?
गुणवान् ननु स: बालक:
विनयशील: संयमी
प्राणतरं प्रजापालक: ।।२।।

दशरथराज्ञ: ज्येष्ठसूनु:
कौसल्याया: लालक:
रघुकुलवंशनायक:
आचरणेन स पावक: ।।३।।

लक्ष्मणभरतशत्रुघ्ना:
प्रियतरप्रियतमबान्धवा:
गुरु: वसिष्ठ: तेजस्वी
अर्धांगिनी सीता माता ।।४।।

राक्षसवधः मित्रसुरक्षा
जायाहरणे प्रापण-इच्छा
रावणनिर्दालने शौर्यं
प्रजारञ्जने औदार्यम् ।।५।।

आदर्शः सः पुत्रोऽपि
पतिपिताराजाशत्रुरपि
वाल्मिकिना लिखितायनं
पठ्यते रामायणम् ।।६।।

## (२४)

## चल चल मित्र

चल चल मित्र चलाव:
प्रभाते किञ्चित् चलाव: ।।१।।

क्रीडाङ्गणे धावाव:
नैकखेलान् खेलाव: ।।२।।

ग्रन्थालयं च गच्छाव:
सुचारुग्रन्थान् पठाव: ।।३।।

स्वाभ्यासं लिखाव:
कण्ठस्थीकरणं कुर्व: ।।४।।

अभ्यासानते नृत्याव:
चित्रपटं खलु पश्याव: ।।५।।

मात्राव्हाने खादाव:
विनोदकणिकैर्हसाव: ।।६।।

हा! हा! हा! हा! हसाव:.......

## (२५)
## उड्डय गगने

उड्डय गगने उड्डयत
हंस: बक: काकश्च
चटका चक्रवाकश्च
उड्डय गगने उड्डयत ।।१।।

पक्षान् वितार्य विहरन्तु
शुकसारिका: गायन्तु
श्येनसारसा: पिकमयूरा:
वर्षाकाले नृत्यन्तु ।।२।।

पारावत: षट्पद:
चकोरकौशिककुक्कुट:
नीलकण्ठ: तित्तिर:
परभृतगाने वसन्त: ।।३।।

ममापि इच्छा उड्डयने
दूरप्रदेशं प्रति गमने
विशालगगनं मुक्तमन:
पुन: स्वनीडं आगमने ।।४।।

## (२६)
## गीतवाद्यम्

वाद्यध्वनीन् श्रृणुयाम
गायामः भोः नृत्यामः ।।धृ।।

डिण्डिमध्वनिः डम् डम् डम्
डमरुः वदति डम् डम् डम्
डम् डम् डम् डम् श्रृणुयाम
छम् छम् छम् छम् नृत्यामः ।।१।।

ढम् ढम् ढम् ढम् ढक्कानादः
डम् डम् पुनः ढौलावादः
ढम् ढम् डम् डम् श्रृणुयाम
छम् छम् छम् छम् नृत्यामः ।।२।।

मुरजः स्वरति धाधिंधिन्
घण्टा घण्टयति किण् किण्
धिन् धिन् किण् किण् श्रृणुयाम
छम् छम् छम् छम् नृत्यामः ।।३।।

मृदङ्गः किट्धा धाधा धिंता
घटः ठम् ठम् ठा ठं ठं ठा
तुम् तुम् वीणां श्रृणुयाम
छम् छम् छम् छम् नृत्यामः ।।४।।

तम्बुरवाद्यं तुन् तुन् तुन्
कांस्यताल: झन् झन् झन्
दुन्दुभिवादनं श्रुणुयाम
छम् छम् छम् छम् नृत्याम: ।।५।।

वेणु: संवादिनी मधुरम्
श्रुणुत शीश्कारं नागस्वरम्
तुर्यं बाहुलीनां श्रुण्म:
छम् छम् छम् छम् नृत्याम: ।।६।।

दन्तवीणा विपंची च
तन्त्रीकवाद्यम् ऊर्ध्वक:
स्वर: स्वर्गीय: वाद्यानां
सेवामहे सङ्गीतकलाम् ।।७।।

श्रुणुयाम नृत्याम:
गायाम: वादयाम:.........

## (२७)
## माता पचति

माता पचति सूपम्
मधुरं मधुरम् अपूपम् ।।धृ।।

ओदने घृतं च नवनीतम्
भोजने भवति दधितक्रम्
गोधुमपोलिका पूरिका
द्विदलं सक्तु: पर्पटिका ।।१।।

मोदकलड्डुक-अवदंशा:
मिप्टान्नानि उपदंशा:
रोटिका शाकं नानाविधं
पिष्टिका पूपिका पायसम् ।।२।।

अवलेह: सूत्रिका
संयावश्च कुण्डलिका
मधुगुडशर्करायुतम्
स्वादिप्टं ननु पक्वान्नम् ।।३।।

कटुतिक्तकषायश्च
मधुराम्ललवणस्तथा
आहार: षड्रस: भवेत्
भोजनयाज्ञिकं मन्येत् ।।४।।

## (२८)

## वनं वनम् अभयारण्यम्

वनं वनम् अभयारण्यम् ।
पशूजीवनं निर्भयम् ।।धृ।।

सिंह: राजा रराजते ।
व्याघ्र: गज: विराजते ।।१।।

चञ्चलकपिशशकमृगा: ।
वृक: श्रृगाल: शल्या: ।।२।।

भल्लूक: खड्गी किरि: ।
चित्रोष्ट्र: वनवनमहिषी ।।३।।

तरक्षु: जलाश्व: कङ्गारन: गोरखर: ।
नकुल: विकटश्रृंगश्च गण्डक: चित्ररासभ: ।।४।।

गवय: मार्जार: लोमश: ।
वनमानुष: कृकलास: ।।५।।

वन्यजीवानां कुटुम्वकम्
वनं वनम् अभयाण्यम् ।।६।।

## (२९)
## जलसृष्टिः

जानीमः ननु जलसृष्टिम्
करोतु ईशः जलवृष्टिम् ।।धृ।।

मत्स्यः कच्छपः सर्पः
शिशुमारश्च नक्रः ।।१।।

नराद्ग्राहः शम्बूकः
अष्टभुजः मण्डूकः ।।२।।

कर्कटः पंखहीनः
जलमध्ये भवति लीनः ।।३।।

मत्स्यः कूर्मः अवतारौ
विष्णोः खलु तौ जलमयौ ।।४।।

जानीमः ननु जलसृष्टिम्
करोतु ईशः जलवृष्टिम् ।।धृ।।

## (३०)

## वृक्षाः

परितः वृक्षाः मित्राणि
परिजानीमः सर्वाणि ।।धृ।।

अश्वत्थः अशोकः तालः
देवदारुः वटः तमालः ।।१।।

किंशुकपलाशउदुम्बरम्
खर्जुरकोकरनारिकेलम् ।।२।।

अर्जुनकदम्बएरण्डः
मधुकशाल्मलीताम्बुलः ।।३।।

बकुलः आमत्यकं खदिरः
चन्दनकदम्ब–अक्षोरः ।।४।।

काञ्चनशमीकण्टकवृक्षाः
ओषधिगुणधर्माः वृक्षाः ।।५।।

संवर्धने सदा दक्षाः
भवेम संवर्धनदक्षाः ।।६।।

## (३१)
## वासरनामानि

सप्तवासरा: सप्ताहे
नूतना उषा दिने दिने ।।धृ।।

रविवासर: सूर्यस्य
समय: प्रियतमकार्यस्य ।
सोमवासर: चन्द्रस्य
श्रीशिवपूजा प्रिया कस्य ।।१।।

भौमवासर: मङ्गलस्य
हनुमत्पूजा भवेत्तस्य ।
बुधवासरे बुधदेव६
श्रीविठोबा दिनदेव: ।।२।।

बृहस्पतिवासरश्च य:
गुरुवासरेति ख्यात: ।
शुक्रवासर: श्रीदेव्या:
स्त्रीशक्ते: पूजाया: ।।३।।

शनिवासरे शनिदेव:
मन्दवासर: वदति क:
प्रिया: मे सर्वे वासरा:
जना: भूयात् कार्यतत्परा: ।।४।।

## (३२)

## आकारा:

न केवलं गणिते भवन्ति
न च केवलम् अध्ययने
मिलन्ति आकारा: सर्वत्र
आयुषि च क्षणे क्षणे ।।धृ।।

बिन्दु: लघु: अंश: कश्चित्
रेखा सरला वक्रापि ।।१।।

वर्तुलं गोलाकारम्
त्रिभुजत्रिकोण: पश्य परम् ।।२।।

चतुरस्त्रं चतुष्कोण:
आयत: हि विस्तृत: ।।३।।

कोण: कोणे संजायते
पञ्चकोणषट्कोणायते ।।४।।

संख्यावर्ग: अण्डाकार:
विषमकोण: दीर्घचतुरस्र: ।।५।।

घनाकार: दण्डगोल:
प्रत्येकाकार: अमोल: ।।६।।

चिन्तय आकारा: कुत्र
यत्र तत्र सर्वत्र ।।७।।

## (३३)
## वाहनानि

एकस्मात् स्थानादन्यं
गच्छामः भोः शीघ्रतरम्
ते यानानि वाहनानि
भवन्ति भिन्नभिन्नानि ।।धृ।।

लोकयाने नैकजनाः
विमानयात्रा पुनः पुनः
यन्त्रद्विचक्रिका सदा
जलप्रवासे च नौका ।।१।।

दुर्गयानम् उदग्रयानम्
द्विचक्रिका रुग्णवाहिका
अग्निशमनयन्त्रवाहनं
त्रिचक्रिका धूमशकटयानम् ।।२।।

हस्तवाह्यं कार्षित्रं
मानवप्रगतेः चक्रम्
ज्ञानेन विज्ञानेन
वसुधैवं च कुटुम्बकम् ।।३।।

## (३४)
## भारतीयमासाः

द्वादशमासाः गायन्तु
आयानतु छात्राः आयान्तु ।।धृ।।

चैत्रः वैशाखः ज्येष्ठः
आषाढः श्रावणः भाद्रपदः ।।

अश्विनमासः कार्तिकः
मृगशीर्षः पौषश्च ।।

माघमासः फाल्गुनः
द्वादशमासे मोदः पुनः ।।

आयान्तु छात्राः आयान्तु
द्वादशमासाः गायन्तु ।।

## (३५)
## ऋतुचक्रम्

कथय गणेश
कति ऋतवः?
गुरुवर्ये सन्ति
षड् ऋतवः ।।धृ।।

कथय विस्तरेण
के च ते?
भवन्तु नामानि
हे हे हे ।।१।।

वसन्तऋतुः
चैत्रे वैशाखे
ग्रीष्मऋतुश्च
ज्येष्ठे आषाढे ।।२।।

वर्षाऋतुः
भवति श्रावणे
भाद्रपदेऽपि
वर्षाकरणे ।।३।।

शरद्ऋतुः
अश्विने कार्तिके
हेमन्तश्च
मृगशीर्षे पौषे ।।४।।

शिशिरस्तावत्
माघे भवति
फाल्गुनमासे
शिशिरस्तिष्ठति ।।

सर्वे ऋतवः
उत्सवाः
सृष्टिं नवतां
दायकाः ।।

## (३६)
## भारतीयाः उत्सवाः

सोत्साहाः भारतीयाः
सर्वे उत्सवप्रियप्रियाः ।।धृ।।

चैत्रप्रतिपदा प्रथमोत्सवः
नूतनसंवत्सरप्रारम्भः
रामनवमी हनुमज्जयन्ती
बुद्धपूर्णिमा वसन्तपञ्चमी
भवन्ति वसन्तोत्सवाः ।।१।।

ग्रीष्म–ऋतौ वटपूर्णिमा
आषाढैकादशीस्तथा
नारिकेलपूर्णिमायां
रक्षाबन्धनं संस्कृतदिनम्
हरितालिका गणेशचतुर्थी
ग्रीष्म–वर्षा ऋतुमध्ये
भवन्ति उत्सव–उत्सवाः ।।२।।

शरदि देवी–उपासना
शारदीयनवरात्रं पुनः
विजयादशमी कोजागिरी
दीपावलिः दीपोत्सवः
भवन्ति शरदोत्सवाः ते ।।३।।

हेमन्ते दत्तात्रेयजयन्ती
ततः मकरसंक्रमणमपि
शिशिरे होलिकोत्सवः
रुचिवर्णैः मनोहरः ।।४।।

सोत्साहाः भारतीयाः
सर्वे उत्सवप्रियप्रियाः ।।

## (३७)
## देवतावाहनानि

देवतानां वाहनानि
मन्दानि जवयुतानि ।।धृ।।
ऐरावत: इनद्रस्य
अज: अग्निदेवस्य
मूषक: श्री गणेशस्य
मयूर:कार्तिकेयस्य ।।१।।
व्याघ्रसिंहौ दुर्गाया:
गज: उल्लु: लक्ष्म्या:
गर्दभ: ननु काल्या:
हंसमयूरौ शारदाया: ।।२।।
हंस: ब्रह्मदेवस्य
नन्दी महादेवस्य
वैनतेय: श्रीविष्णो:
सप्ताश्वरथ: सूर्यस्य ।।३।।
स्वे स्वे वाहने आरुह्य
गच्छन्ति ते इतस्तत:
भ्रमन्ति ते इतस्तत:
आहिण्डन्ते इतस्तत: ।।४।।

## (३८)

## मम शरीरम्

जानन्तु भो: जानन्तु
अवयवनामानि जानन्तु ।।

मस्तकमिदं मे सर्वोऽपरि
केशा: घना: तदुपरि
इदं ललाटं भ्रूद्वयम्
नेत्रे कर्णे नासिकेयम् ।।१।।

ओष्ठौ दन्ताश्च जिह्वा
स्कन्धौ हस्तौ मम ग्रीवा
वक्ष: उदरं कटिस्तथा
करतलचरणा: अङ्गुल्य: ।।२।।

ऊरुद्वयं जानुद्वयम्
चरणतलद्वयं सुदृढम्
शरीरमिदं मे शरीरमिदम्
ईशप्रसाद: शरीरमिदम् ।।३।।

व्यायामै: खलु रक्षामि
पौष्टिकान्नं भक्षामि ।।

## (३९)
## दिक् ज्ञानम्

भोः बालकाः
आगच्छन्तु
दिशः जानन्तु
सर्वे दिशः जानन्तु ।।धृ।।

एका दिक् नैकाः दिशः
कति दिशः कति दिशः?
महोदये, चत्वारि वा?
न, न, न, न, न चत्वारि ।।१।।

अष्टदिशः सत्यं खलु?
नैव नैव, न अष्ट
अस्तु श्रुणुत, दश दिशः
कति दिशः? दशदिशः ।।२।।

दशदिशां दशदिक्पालाः
जानीमः तान् दिक्पालान्
प्राची दिक् – इन्द्रः दिक्पालः
प्रतीची दिक् – वरुणः दिक्पालः ।।३।।

उदीची दिक् कुबेरः दिक्पालः
अवाची दिक् यमः दिक्पालः
ईशानदिक् ईशानः दिक्पालः
आग्नेयाम् अग्निः दिक्पालः ।।४।।

नैऋत्यदिक् सूर्यः दिक्पालः
वायव्यदिक् – वायुः दिक्पालः
ऊर्ध्वदिक् – ब्रह्मा दिक्पालः
अधोदिक् – विष्णुः दिक्पाल ।।५।।

प्रतिदिनं वन्दामहे
दशदिशः दशदिक्पालान् ।।

## (४०)
## वर्णमालागीतम्

**स्वराः**

गायन्तु सर्वे अ आ ई

पठन्तु सर्वे क ख गी

| | |
|---|---|
| अ अ अश्वः, | आ आ आम्रम् |
| इ इ इष्टिका, | ई ई ईशा |
| उ उ उष्ट्रः | ऊ ऊ ऊर्णा |
| ऋ ऋ ऋषिः | |
| ओ ओ ओष्ठौ, | औ औ औषधम् |

# व्यञ्जनानि

क क कमलम्, ख ख खड्गः

ग ग गणेशः घ, घ घटः

ङ् ङ् गङ्गा

च च चक्रम् छ छ छत्रम्

ज ज जलम् झ झ झरः

ञ् ञ् चञ्चुः

ट ट टङ्कः

ठ ठ ठठकः

ड ड डमरुः ढ ढ ढौलः

ण ण बाणः

त त तरुः थ थ थोडनंः

द द दर्पणः ध ध धनुः

न न नलः

प प पर्णम् फ फ फणी

ब ब बकः, भ भ भल्लूकः

म म मयूरः

य य यज्ञः

र र रथः

ल ल लड्डुः

व व वटः

श श शशकः

ष ष षट्पदः

स स सरः

ह ह हलम्

क्ष क्ष क्षत्रियः

त्र त्र त्रिशुलः

ज्ञ ज्ञ ज्ञानेश्वरः

वर्णमालां श्रुण्मः

वर्णमालां पठामः

वर्णमालां लिखामः

वर्णमालां वदामः

अन्ते सर्वे हसामः हा हा हा !

आनन्देन हसामः हा हा हा !

## (४१)
## सेवामहे

श्रुणुत बालका: सर्वे सेवका:
भवन्ति नितरां सेवारत:
अत: जीवनं सुकरं भवति
अधिकमेव सुन्दरं च भवति ।।१।।

अध्यापयति स शिक्षक:
संरक्षति स: रक्षक:
वस्त्राणि सीवति सौचिक:
वस्त्रप्रक्षालनार्थं रजक: ।।२।।

पत्रवाहक:, मालाकार:
लौहकार:, स्वर्णकार:
कुम्भकार:, आपणिक:
पत्रकार:, चालक: ।।३।।

सम्पादक:, वाहक:
अभियन्ता, श्रमिक:
नापित:, सेवक:
कृषक:, प्राध्यापक: ।।४।।

कर्मकरः, तन्तुवायः
गोपालकः, चर्मकारः
कांस्यकारः, भारवाहकः
मायाकारः, अधिवक्ता ।।५।।

क्रीडकः, चित्रकारः
मूर्तिकारः पाचकः
लेखकः, वैद्यश्च
रङ्गकारः, लेपकारः ।।६।।

कविः धीवरः, लिपिकः
नर्तकः, गायकः, वादकः
न्यायाधीशः, वैज्ञानिकः
विदूषकः, संवाहकः ।।७।।

वास्तुकारः, परिचारिकाः
वैमानिकः, पूजकः
तक्षकः, सैनिकः
सर्वे श्रेष्ठाः सेवकाः ।।८।।

श्रमप्रतिष्ठां कुर्वन्तु
धन्यवादान् वितरन्तु
नितरां धन्यवादान् वितरन्तु ।।९।।

## (४२)
## अमृतं संस्कृतम्

अमृतम् अमृतम्
पठत संस्कृतम्
अमृतम् अमृतम्
खाद्यस्वरूप-अमृतम् ।।धृ।।

धान्यं धान्यं
प्रियङ्गुधान्यम्
यवः गोधूमः
तण्डुलधान्यम् ।।१।।

शिम्बिः माषः मसूरः
मुद्गः चणकः तूवरः
तिलः मधुः मुद्गफली
शर्करा अपि च पायसः ।।२।।

दुग्धं दधि च तक्रं च
नवनीतं ततः घृतम्
पोलिका रोटिका
पिष्टजा शाकरोटिका ।।३।।

सम्पुटाशः शीतपानकम्
सोपस्करदोसा उपादंशः
उपसेचनं च पूरिका
दाधेयं क्वथितं शाल्यपूपः ।।४।।

कृशरा पर्पटः लप्सिका
समाशः जलपूरिका
पक्ववटिः कासालुः
सुपिप्टकं स्मिग्धपिष्टकम् ।।५।।

पयोहिमं चाकलेहः
अवलेहः अल्पाहारः
फलपाकः मुद्गपूर्णिका
पिण्डकाः लड्डूकाः ।।६।।

रसनातृप्तिः भेवत् सदा ।
उदरपूर्तिः भवेत् सदा ।।७।।

## (४३)
## कः समयः

एकस्मिन् दिने
दिवसः रात्रिः
क्षणे क्षणे
समयसारणिः ।।१।।

षड् ऋतवः कृष्णपक्षः
शुक्लपक्षः द्वादशमासाः
उत्तरायणं दक्षिणायनम्
प्रभातवेला मध्यान्हम् ।।२।।

सायं रात्रिः मध्यरात्रिः
दिनम् उषा संध्याकालः
घण्टा तासिका अर्धघण्टा
निमिषाः भवन्ति क्षणक्षणाः ।।३।।

क: समय: क: समय:
प्रश्न: भवति प्रतिक्षणम्
एकवादनं द्विवादनम्
त्रिचतुर्पञ्चवादनम्
षड्सप्ताष्टनववादनम्
दशैकादशद्वादशवादनम् ।।४।।

सपादसार्धपादोन
पञ्चाधिकं दशाधिकम्
पञ्चोन-दशोन
एवं भवति समयज्ञानम् ।।५।।

अनन्तकाल:
अनन्तसमय:
समये समये
गच्छति समय: ।।६।।

उपयोजनं च
क्षणे क्षणे
अमूल्यकार्यं
क्षणे क्षणे ।।७।।

## (४४)
## कदा चि किम्

कथय मधुश्री
कदा च किम्?
किं किं कार्यं
कदा च किम् ।।१।।

जागरणं प्रभातसमये
दन्तधावनं ततश्च मे
यदा बुभुक्षा भोजनं
निद्रासमये मे शयनम् ।।२।।

हे उत्कर्ष, कथय रे माम्
कदाभ्यासं करोषि त्वम्?
अद्य अभ्यास: श्व: अभ्यास:
परश्व: तथा खेलनं
प्रपरश्व: मित्रमेलनम् ।।३।।

एष सुधांशु: क्रीडापटु:
कदा ते पठनं कदा हि क्रीडनं
ह्य: क्रीडनं परह्य: खेलनं
प्रपरह्य: पठनं च लेखनम् ।।४।।

अयि स्वामिनि वीणावादिनी
कथय कदा किं करोषि त्वम् ।
प्रभाते शाला सायं क्रीडा
रात्रौ अभ्यासः नितरम् ।।५।।

एहि स्वरूप, खेलसि किम्?
कथय प्रियं ते किम् किम् किम्
गीतश्रवणं भ्रमणं च
रोचते मह्यं निशिदिनम् ।।६।।

हे भाग्येश, के तव छन्दाः
कदा च किं करोषि पुत्र
सदासर्वदा पठामि नित्यं
संस्कृतभाषां वदामि नित्यम् ।।७।।

श्रुतिश्वेते भगिन्यौ च
वदतं किं कदा कार्यम्
ज्ञानग्रहणम् आदिनं च
रविवासरे बहिर्भ्रमणम् ।।८।।

हे नचिकेताः, कथय त्वम्
कदा च, किं किं करोषि त्वम्
सङ्गणके मम कार्यम्
अनुक्षणं ज्ञानग्रहणम् ।।९।।

सुष्ठु साधु भोः सर्वेऽपि
सदासर्वदा कार्येऽपि
मग्नाः भवन्तु
लग्नाः भवन्तु
व्यग्राः भवन्तु सर्वेऽपि ।।१०।।

## (४५)
## षड् रसा: भोजने

रसना रस्यते इति रस:
भोजनं भवतु वै षड्रस: ।।धृ।।

मधुमधुरं प्रियप्रियतमम्
गुडशर्करे च पक्वाम्रम्
आम्लम् आम्लं नीम्बुकम्
तिंतिडि तथा च हरिताभ्रम् ।।१।।

लवणं भवति लवणयुतम्
सैन्धवसामुद्रिकलवणम्
कटुरसपूर्णा मरीचिका
रक्तवर्णिया हरितिका ।।२।।

कारवेल्ल: तिक्तरसयुतम्
आरोग्यार्थं तिक्तसेवनम्
कषायरस: आमलक:
सेवनीय: खलु गोलक: ।।३।।

रोचेत वा न रोचेत
सेवेत रसान् सेवेत
षडैते रसा: वरदानम्
परमेशस्य वरदानम् ।।४।।

## (४६)
## साहित्ये नवरसा:

भारतीयं साहित्यम्
विपुलं जगति विपुलतरम्
नवरसयुक्तं मधुमधुरम्
भारतीयं साहित्यम् ।।१।।

श्रृङ्गार: वीर: करुण:
अद्भुत: हास्य: भयामक:
बीभत्स: रौद्र: शान्तश्च
काव्ये भवन्ति नवरसा: ।।२।।

मोदकरा: आमोदकरा:
नित्यनवीना: नवरसा:
नृत्ये गायने वादने
पठने पाठने सङ्गीते ।।३।।

नाट्ये काव्ये गद्यपद्ययो:
शब्दे अर्थे भावार्थे
भावाविष्कारा: रसा:
सर्वे सेवनीया: नवरसा: ।।४।।

## (४७)
## प्राचीनभारतीयवैज्ञानिकाः

जानीमः भारतगाथाम्
ज्ञानविज्ञानपरम्पराम्
ऋषयः ते वैज्ञानिकाः
ज्ञानिनः संशोधाकाः ।।१।।

आर्यभट्टः बौधायनः
ब्रह्मगुप्तः भास्कराचार्यः
कणादनागार्जुनौ तथा
वराहमिहिरः चरकश्च ।।२।।

सुश्रुतवाग्भटपिङ्गलाः
पतञ्जलिः चाणक्यः
पाणिनिः कौमारभृत्यः
मनुयाज्ञवल्क्यौ भरतः ।।३।।

नैके भारतभूषणाः
विद्वांसः ते ज्ञानिनः
शास्त्रज्ञाः शस्त्रज्ञाः
भारतीयाभिमानिनः ।।४।।

## (४८)

### नवग्रहाः

नभोमण्डले चरन्ति ते
भ्रमन्ति सदा परिभ्रमन्ति ते ।।धृ।।

सूर्यः चन्द्रः मङ्गलः
बुधः बृहस्पतिः शुक्रः
शनिः राहुः केतुश्च
एते नवग्रहाः मताः ।।१।।

सूर्यमालेयम् अस्माकम्
पृथिवीमाता अस्माकम्
अबब ! प्रगतं प्राचीनम्
खगोलशास्त्रं भारतीयम् ।।२।।

कषायवर्णीयः सूर्यः
शुभ्रकान्तिः चन्द्रमाः
रक्तवर्णस्य मङ्गलः
बुधःप्रियङ्गुकलिकाश्यामः ।।३।।

गुरुः काञ्चनसमवर्णः
शुक्रः हिमकुन्दवर्णीयः
शनिः नीलाञ्जनवर्णः
धूम्रवर्णः राहुश्च ।।४।।

केतुः पलाशपुष्पसमः
वन्द्याः नवग्रहाः सदा ।
एतेषाम् आशीर्वचनं
प्रापणीयं हि सर्वदा ।।५।।

## (४९)
## मातृसाहाय्यम्

सदैव माता कार्यरता
नैव भवति विश्रान्ता ।
मातृसाहाय्यम् आचरामः
तस्यै भवतु आरामः ।।१।।

प्रिय मे अम्ब, उपविश त्वं
कार्यकारणात् विरम त्वम् ।
धावसि यन्त्रं यथा हि त्वं
विरम विरम विरम रे त्वम् ।।२।।

प्रभातकालादारभ्य
करोषि अनन्तकार्याणि ।
गृहं कुटुम्बं सर्वाणि
प्रियं प्रियतरप्रियतमानि ।।३।।

करोमि साहाय्यं त्वत्कार्ये
निवेदय किं किं कार्यम् ?
जलभरणं स्वच्छीकरणं
वस्त्रप्रक्षालनं तथा ।।४।।

पाठय मां किञ्चित् पाकं
उपाहारमपि तेन साकम्
मध्ये मधये पचामि
तव कष्टानि जानामि ।।५।।

आदिनं कुरु विश्रामं
केवलं च मार्गदर्शनम् ।
माता रूपं भगवत:
मातरं च सेवे नित्यम् ।।६।।

## (५०)
## पात्राणि

गृहे गृहे भवन्ति तानि
कानि कानि पात्राणि?
पाकशाला सज्जास्ति
हस्तधावनी सिद्धास्ति ।।१।।

चुल्लिका कन्दु: धिषणा च
कंस: चषक: ऊलूखलम्
पेषणयन्त्रं मिश्रकम्
कसोटिका कटोरम् ।।२।।

कांचचषक: पानभाण्ड:
कलश: चमस: करण्ड:
उष्णरक्षकं मन्थानी
संदंश: शर्प: पट्टश्च ।।३।।

द्रोणी दर्वी वेल्लनी
छुरिका ईली बाष्पस्थाली
स्थालिका रन्ध्रदर्वी शराव:
कर्तरिका तप्तकं कटाह: ।।४।।

चालनी शोधिनी समदर्वी
ऋजीषम् च सा कूपी
घट: उखा शंकुला
अवकारिका कांचघटी ।।५।।

पिष्टिशिला हण्डिका जालपात्रम्
मूसलं भोजनपात्रम्
गृहे गृहे सार्वत्रिकाणि
पात्रं पात्रे पात्राणि ।।६।।

## (५१)
## भारतीयसंख्यागणनम्

पणकं पणकम्
अर्जय रे
सुपात्राय देहि
दानं रे ।।

उपभोगाय दानाय
धनोपयोगः देशाय
रुप्यकं भारतीयरुप्यकं
गणनं मूल्यं सदा सुकरम् ।।

एकं दशं शतं च
सहस्रं लक्षं दशलक्षम्
कोटिदशकोटिमितम्
अब्जं खर्वं निखर्वम् ।।

पद्मं महापद्मं
शङ्खः जलधिशङ्खः
अन्त्यं मध्यं परार्धं
महापरार्धं धुनं महाधुनम् ।।

शून्यं प्रदत्तमस्ति तत्
शून्येन गणना क्रिया
भारतस्य योगदानं हि
संख्या शून्यं च सत्क्रिया ।।

# कवयित्री परिचय:

- डॉ. मञ्जूषा मृणालिनी पण्ढरीनाथ: कुलकर्णी
- (एम. ए. एम. एण्ड सेट, नेट, पीएच.डी.)
- महाराष्ट्रलोकसेवायोगपरीक्षायां सर्वप्रथमस्थानमधिगत्य राजपत्रिताधिकारिणी वर्ग १ रुपेण महाराष्ट्र शासने विगतेम्य: २३ वर्षेभ्य: कार्यरता ।
- सद्य: प्रशासकींयाधिकारिणी, मा. मुख्यमन्त्री सचिवालय: मन्त्रालय: , मुम्बई ।
- महाराष्ट्रशासनस्य प्रथमपूर्णकालिकभाषासञ्चालिका ।
- 'साहित्याकादमी - संस्कृतानुवाद पुरस्कार: २०२०' अनेन सम्मानिता लेखिका, कवयित्री च ।
- सिद्धहस्तलेखिका कवयित्रीरूपेण १०० अधिकग्रन्था: प्रकाशिता : ।
- संस्कृत-मराठी-हिन्दी भाषासु सातत्येन विविधलेखनम् ।
- साहित्यशिक्षणभाषासंस्कृतिक्षेत्रेषु निरन्तरयोगदानम् ।
- मराठीकाव्यक्षेत्रे विश्वविक्रमस्य सन्मानस्थानम् ।
- 'शारदातनया' इति गणमान्यता ।

- ‘श्यामची आई’ इति मराठीख्यातपुस्तकस्य ‘श्यामस्य माता’ इति संस्कृतानुवादात्? बालभारती पाठ्यक्रमे पाठसमावेश: ।
- डॉ. प्रकाशबाबाआमटे महोदयस्य ‘प्रकाशवाटा’ अस्य ‘प्रकाशमार्गा:’ इति संस्कृतानुवादार्थं साहित्याकदम्या: पुरस्कार: ।
- साहित्याकादम्या तर्कतीर्थलक्ष्मणशास्त्रीजोशीवर्यस्य मूलमराठीग्रन्थस्य ‘वैदिकसंस्कृते: विकास:’ इति संस्कृतानुवादोऽपि प्रकाशित:। अन्यग्रन्थद्वयस्य अनूदनं प्रचलति ।
- विविधनामांकितराष्ट्रीयराज्यपुरस्कारै: सभाजिता ।
- ‘वक्ता दशसहस्रेषु’ इति ख्यातकीर्तजीवनम्? ।
- अध्यापन-प्रशासन-संशोधन-लेखन-अनुवाद-निवेदन-सूत्रसञ्चालन-व्याख्यान-प्रवचन-नाट्यस्य एकपात्रप्रयोगादिभि: नानाविधाभि: निरन्तरं प्राचीनसंस्कृतभाषाया: प्रसारप्रचारे निरता ।


DR. MANJUSHA KULKARNI
LITERATURE - SANSKRIT

# ABOUT HER




It is rightly said that "Language is not just a medium of expression; it is the soul of a civilization." In an age defined by rapid modernization and globalized languages, Dr. Manjusha Kulkarni stands out as a fierce and visionary champion for Sanskrit—the mother of India's linguistic and philosophical heritage. Where many seek to translate Sanskrit into regional languages, she courageously reverses this flow translating over 09 celebrated works into Sanskrit. This pioneering effort repositions Sanskrit not as a language of the past, but as a language of the present and future.

Her contributions are monumental: over 100 published books, including 22 in Sanskrit original writings, translations and related. 5,000+ poems, 100+ peer-reviewed Research papers and presentation in International and national journals, more than 1,000 lectures focusing mainly on Sanskrit, and 100+ national and state-level awards and scholarships. A landmark achievement is her Sanskrit translation of Dr. Prakash Amte's biography, Prakashmargha, which earned her the prestigious Sahitya Akademi Award—a rare feat that reaffirms her literary excellence and national relevance.



Holding a PhD in Sanskrit, she has guided over 5 doctoral researchers, building the next generation of Sanskrit scholars. As the first female full-time Director of Languages for the Maharashtra Govt., she helped craft and implement language policies that made Sanskrit and Marathi more accessible in administration and education.

Her efforts have inspired thousands of youths, expanded Sanskrit's footprint in classrooms, government institutions, and cultural forums, and reinvigorated national pride in India's linguistic legacy.






# HER EARLY LIFE



She was born on 23rd June 1977 in the culturally rich town of Tuljapur, Maharashtra. Her early life was shaped profoundly by the intellectual environment in her home. Her father nurtured a love for reading, bringing home a new book every week with a standing rule: it must be read and discussed by Sunday. This disciplined exposure to literature sowed the seeds of deep analytical thinking in her. Her mother, with a strong command over Sanskrit, instilled in her the beauty and logic of the ancient language, teaching her its foundational elements from a young age. Additionally, her great-grandfather, a revered literary figure in Maharashtra, became a guiding legacy—his contributions to literature ignited in her a sense of purpose and a calling to write. This rich lineage of language, learning, and literature defined her path.



Her highest degree is a PhD in Sanskrit from Sant Gadge Baba Amravati University in 2009.

# HER JOURNEY

Her journey to reviving Sanskrit has been several personal and professional challenges. Navigating societal expectations, financial constraints, and the demands of single parenthood, she endured immense challenges while balancing her home, children, and professional responsibilities. Often sacrificing sleep for her passion, she remained unwavering in her pursuit of art, language, and service.

Her accomplishments are grounded in rigorous academic training and unwavering commitment. A double graduate in Sanskrit (Pune University and Tilak University), she pursued a Master's and later a Ph.D. in Sanskrit from Sant Gadgebaba Amravati University in 2009. She cleared SET and Sanskrit NET on her first attempt and ranked third nationally in her M.Ed from SMBT University. She also cracked the Maharashtra Public Service Commission (MPSC) exams with top ranking and was selected through direct recruitment as a language expert. Her academic journey is a testament to years of disciplined scholarship and dedication to language promotion.



What makes her contributions unique is her multidimensional approach—reviving ancient languages while integrating them into modern platforms. Her writing style merges tradition with relevance, and she connects with audiences through literature, translation, art, and performance. Her ability to convey profound cultural messages in simple, relatable forms sets her apart.

Though her base remains in Maharashtra, her influence spans across Indian states like Karnataka, Kerala, Madhya Pradesh, Gujarat, Odisha, Kashmir, UP and many more and Delhi through lectures, performances, and language policies. Internationally, her cultural outreach has reached audiences in Thailand, etc. Her Sanskrit translations and lectures have made ancient Indian wisdom accessible to global learners and diasporas.

Her journey began early—writing essays and stories from as young as fourth grade, encouraged by her father's love for books and her mother's mastery of Sanskrit. Though marriage briefly paused her literary journey, she resumed it with fervour in 2010. Since then, she has authored countless poems, essays, and books across Marathi, Hindi, and Sanskrit. Inspired by a desire to revive Sanskrit, she envisions herself as a bridge between classical knowledge and contemporary society—ensuring that India's linguistic and cultural legacy thrives for generations to come.



# HER WORKS

## CONTRIBUTIONS TO SANSKRIT LITERATURE

## EFFORTS FOR PROMOTION OF SANSKRIT LANGAUGE

## CONTRIBUTIONS TO MARATHI LITERATURE



## CONTRIBUTIONS TO SANSKRIT LITERATURE

She has emerged as a powerful torchbearer in the revival and promotion of Sanskrit literature, combining academic rigor with cultural sensitivity. She believes that Sanskrit is not merely a classical language, but the foundational root of Indian knowledge systems and the mother of all languages. With this conviction, she has devoted her life to making Sanskrit accessible and engaging for all sections of society.

To bridge the gap between the classical and the contemporary, she has undertaken two monumental efforts—original compositions in Sanskrit and translations of important regional works into Sanskrit.







प्रकाशमार्गः


विवेकरत्नानि


वैदिकसंस्कृतेः विकासः






माता


स्मृतिवचनानि


संस्कृत-मराठी
उखाणे
डॉ. मंजूषा कुलकर्णी

## A. PIONEERING TRANSLATION WORK

She has translated over 15 prominent Marathi books and into Sanskrit, breathing new life into both the source material and the receiving language. Her translations include profound works such as:

- o Two writings of Swami Vivekananda
- o Shyaamasya Maata
- o Vaidik Sanskruti ka itihas by Tarkteerth Laxman ShastriJoshi
- o Prakashmargaha
- o Biography of Swatantryaveer Sawarkar Completed First volume of approx. 400 pages + Part 2,3,4 translation work is ongoing (approximately 1300 pages)

She innovatively reintroduced the traditional "Ukhana" style into Sanskrit, composing over 200 Sanskrit Ukhanas—short, witty poetic couplets—thus blending household tradition with classical expression.

A major milestone in her career is the translation of the four-volume biography of Swatantrya Veer Savarkar into Sanskrit—she was selected from across India to undertake this prestigious work, and has already completed two volumes. The Sahitya Akademi entrusted her with the translation of Vedic Sanskriti ka Itihaas, which it also published—an honour reserved for only the most credible scholars. She is currently working on the Sanskrit translation of Sudha Murthy's biography and the autobiography of Sanskrit stalwart Vasantrao Gadgil. Her book Prakashmarga is a Sanskrit translation of Dr. Prakash Baba Amte's biography in Marathi. This work is an account of an altruistic struggle & committed persistence in action by a humble social worker who sacrificed his career & dedicated his whole life for the social development.

# B. HER ORIGINAL WORKS

Her original Sanskrit works reflect her progressive mindset and devotion to cultural preservation. Baal Modini, published by Satyam Publications Delhi, introduces children to Sanskrit in a joyful way. Vedkaleen Stree Ratnani highlights the contribution of Vedic women like Ghosha, Apala, Surya, Gargi, Maitreyi and Shradhha etc 32 great vedic women. She has authored 28 books in Sanskrit as her original work, translation and Sanskrit related Marathi books to including her date and writing time also daily. Her work Shyamasya Mata is now part of the Class 9 Sanskrit syllabus.

Through her work, she has made Sanskrit more accessible not only to scholars but also to laypersons, creating a new generation of culturally rooted learners.



My Sanskrit Book Publication Ceremony by Hon. Devendra Phadanvis

# EFFORTS FOR PROMOTION OF SANSKRIT LANGAUGE



Her lifelong mission is the revival and mainstreaming of Sanskrit, the ancient mother of languages, in an age increasingly driven by modernity. Her role as the first female full-time Director of Languages for the Government of Maharashtra (2015–2017) helped formalize and promote linguistic policies, but her deepest impact lies in the relentless promotion of Sanskrit through academic, literary, and cultural platforms.

She has delivered over 1,000 lectures and 500+ public speeches, the majority in Sanskrit, across Maharashtra, Karnataka, Kerala, Ujjain, and Kashmir, covering themes from the Vedas to positive psychology, connecting classical wisdom to modern life. Her public engagement includes more than 200 conferences as a resource person, where she tirelessly advocated for Sanskrit's relevance today.

A prolific scholar, she has published 100+ research papers and has 26 books currently in the pipeline. Her Sanskrit poetry, now reaching thousands through daily social media posts, reinforces language revival through digital means. She innovates in expression, even using mono-acting in Sanskrit, engaging young and lay audiences alike.

She edits key government publications, including Navaras and Bhasha Sanchit, and contributes regularly to platforms like Lokmat, Vedant Shri, and Sai Leela. As a longstanding member of Sanskrit Bharati (since 1994) and the Sanskrit Advisory Board, Delhi, she also anchors programs at Akashvani and Raj Bhavan, and writes speeches in Sanskrit and Marathi for high dignitaries including the Governor and Chief Minister of Maharashtra.

In every role—administrator, author, or orator—Sanskrit remains her soul's language and life's mission, ensuring its renaissance in modern India.




Sanskrit Sammelan Anchoring at Aurangabad

## CONTRIBUTIONS TO MARATHI LITERATURE

Her contributions to Hindi and Marathi literature stand as a testament to her unparalleled dedication to enriching Indian languages and preserving cultural heritage through literature. With a literary corpus of over 100 books—80 in Marathi, 5 in Hindi, and 15 in Sanskrit—her work spans a stunning breadth of subjects, forms, and innovations.



In Marathi literature, he has made pioneering contributions that fuse tradition with modernity. Her books such as Vigyanatla Sanskrit, Smruti Rachnani, Vedakaleen Stree Ratnani (also available in Sanskrit), Shodhamrut, Gauravgaatha Suryachi, and Anu Vidnyanateel Zanzavaat delve into themes of science, memory, Vedic womanhood, and cosmic elements. Her literary expression is not just vast but deeply insightful. She has penned over 5,000 poems—currently in the process of publication—each resonating with cultural depth and emotional sensitivity.



*Kirtan on Marathi Sant Sahitya*

She brings a unique thematic focus to her work. She has authored entire volumes centred on a single flower, on the love of Radha and Krishna, on a single day, and on contemporary issues in the form of relevant poems. Her ability to structure whole books around these ideas demonstrates an extraordinary creative vision. Furthermore, Ahilyabai Holkar's biography adds to her rich contributions in historical literature. She has also ventured into audio storytelling with Manju-Manjiri and Sarg-Nisarg, expanding access to literature through digital formats.



Proud of Marathi Speech at Mumbai University Convocation Hall

In Hindi, Dr. Kulkarni has made equally impactful contributions. She has translated and simplified Chanakya's Arthshastra into two accessible volumes, enabling laypeople to engage with this ancient treatise on economics and governance. Her other notable Hindi works include Smrutigranth, Surya aur Manav, and Pracheen Nyay. These texts examine traditional Indian wisdom through a contemporary lens—exploring the role of the Sun in science, health, environment, and poetry, and offering insights into India's ancient judicial systems, rich social culture. Her Hindi Poetry also very significant.

Her work in both languages not only deepens literary discourse but also serves a larger mission: to educate, inspire, and reconnect society with its cultural roots.


CERTIFICATE
Education
E-LEARNING
Strategy

# वैदिकसंशोधनमण्डलम्

देहलीस्थेन केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था, पुणे – 411037

## शङ्कराचार्यन्यासः

इत्यनयोः संयुक्ताध्वर्येण

केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानेन च सञ्चालिता

## वेदभाष्यकाराः

इति शीर्षकान्विता राष्ट्रियसङ्गोष्ठी (11.12.2023 तः 13.12.2023 पर्यन्तम्)

**प्रमाणपत्रम्**

प्रमाणीक्रियते यत् प्रो/डा/श्रीमती/श्री मञ्जुषा कुलकर्णी ........ 2023 वर्षस्य डिसेम्बर् मासस्य 11-13 दिनाङ्केषु वैदिकसंशोधनमण्डलेन समायोजितायां वेदभाष्यकाराः इति शीर्षकान्वितायां त्रिदिवसीयायां राष्ट्रियसङ्गोष्ठ्यां व्याख्यातृत्वेन/ सत्राध्यक्षत्वेन/ पत्रवाचकत्वेन/ प्रतिभागित्वेन भागमग्रहीत्। [illegible] ........ इति शीर्षकमधिकृत्य शोधपत्रं प्रास्तावीत् च।

**(Certificate)**

This is to certify that Prof/Dr/Mrs./Mr........ took part as Speaker/ Session President/ Paper Presenter/ Participant in the Three-day National Seminar on Vedabhāṣyakārāḥ held at Vaidika Samshodhana Mandala, Pune from 11-13 December 2023. He/She has presented a Paper on ........

| संयोजकः | सहसंयोजकः | सहसंयोजिका | प्रभारिनिदेशकः |
|---|---|---|---|
| (डा. ओङ्कार जोशी) | (श्री कृष्णा माळी) | (श्रीमती मुक्ता मुळे) | (डा. वि. सुब्रह्मण्यः) |


अन्ताराष्ट्रिय–संस्कृत–सम्मेलनम्

International Sanskrit Conference

उत्तराखण्ड–संस्कृत–विश्वविद्यालयः, हरिद्वारम्, (उत्तराखण्ड) भारतम्

Uttarakhand Sanskrit University, Haridwar, Uttarakhand, India

प्रमाण–पत्र

प्रमाणीक्रियते यद् प्रो० / डॉ० / श्री / श्रीमती / कु० मञ्जुषा कुलकर्णी, अध्यक्षा, संस्कृत वि० शासकीय ज्ञान विज्ञान महावि० औरंगाबाद, महाराष्ट्र

उत्तराखण्ड संस्कृत विश्वविद्यालयेन सितम्बर मासस्य 26, 27, 28 तारिकासु देहरादूनस्थ राजभवने समायोजिते अन्ताराष्ट्रिय–संस्कृत सम्मेलने भागं गृहीत्वा

'भगवद्गीतया: जीवनविज्ञानम्'

शीर्षकं शोधपत्रं प्रस्तुतवान् / प्रस्तुतवती। सम्मेलने सत्राध्यक्ष / सारस्वत अतिथि / संयोजकरूपेण महद् योगदानं कृतवान् / कृतवती।

